दीनबंध्वष्टकं

दीनबंध्वष्टकं

यस्मादिदं जगदुदेति चतुर्मुखाद्यं
यस्मिन्नवस्थितमशेषमशेषमूले |
यत्रोपयाति विलयं च समस्तमंते
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 1 ||

चक्रं सहस्रकरचारु करारविंदे
गुर्वी गदा दरवरश्च विभाति यस्य |
पक्षींद्रपृष्ठपरिरोपितपादपद्मो
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 2 ||

येनोद्धृता वसुमती सलिले निमग्ना
नग्ना च पांडववधूः स्थगिता दुकूलैः |
सम्मोचितो जलचरस्य मुखाद्गजेंद्रो
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 3 ||

यस्यार्द्रदृष्टिवशतस्तु सुराः समृद्धिं
कोपेक्षणेन दनुजा विलयं व्रजंति |
भीताश्चरंति च यतोऽर्कयमानिलाद्याः
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 4 ||

गायंति सामकुशला यमजं मखेषु
ध्यायंति धीरमतयो यतयो विविक्ते |
पश्यंति योगिपुरुषाः पुरुषं शरीरे
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 5 ||

आकाररूपगुणयोगविवर्जितोऽपि
भक्तानुकंपननिमित्तगृहीतमूर्तिः |
यः सर्वगोऽपि कृतशेषशरीरशय्यो
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 6 ||

यस्यांघ्रिपंकजमनिद्रमुनींद्रबृंदै-
-राराध्यते भवदवानलदाहशांत्यै |
सर्वापराधमविचिंत्य ममाखिलात्मा
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 7 ||

यन्नामकीर्तनपरः श्वपचोऽपि नूनं
हित्वाखिलं कलिमलं भुवनं पुनाति |
दग्ध्वा ममाघमखिलं करुणेक्षणेन
दृग्गोचरो भवतु मेऽद्य स दीनबंधुः || 8 ||

दीनबंध्वष्टकं पुण्यं ब्रह्मानंदेन भाषितं |
यः पठेत् प्रयतो नित्यं तस्य विष्णुः प्रसीदति || 9 ||

इति श्रीमत्परमहंस स्वामि ब्रह्मानंद विरचितं दीनबंध्वष्टकं |